International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(1): 16-19
© 2022 IJSR
www.anantaajournal.com
Received: 11-11-2021
Accepted: 14-12-2021

**Vadiraja KS**
Assistant Professor, B.B.A & B.Com. Department Dayananda Sagar College of Art, Science & Commerce, Bengaluru, Karnataka, India

**Corresponding Author:**
**Vadiraja KS**
Assistant Professor, B.B.A & B.Com. Department Dayananda Sagar College of Art, Science & Commerce, Bengaluru, Karnataka, India

# वेदवेदान्तादिनिरूपितप्राचीनज्ञानप्राप्त्युपायानामाधुनिककालयौचित्यम्

**Vadiraja KS**

## प्रस्तावना

ज्ञानप्राप्तावथवा ज्ञानप्रदाने पाठ्यो विषयो यथा प्रधानो भवति तथा पाठनविधानमपि प्रधानं भवति। आचार्यः ज्ञानप्रदानात् प्राक् शिष्याणामासक्तिं, सामर्थ्यं, धारणाशक्तिं, ग्रहणशक्तिं जानीयात्। तदनुसारं ज्ञानप्रदानं कुर्यात्। तदर्थं विविधविधानान्यप्यनुसरेत्। न केवलं पाठः पाठनीयः इति धिया स्वस्तरानुसारं पाठयेदाचार्यः। किन्तु शिष्यस्य स्तरं जानन् तत्स्तरमवतरन्स्तदनुसारं पाठयेत्। तदतिरिच्य प्रत्येकं छात्रस्यापि वर्धनं प्रधानं भवति। अतः प्रत्येकमपि छात्रस्य विषये मनः निधाय तस्य वर्धनार्थं प्रयतेत। यः सत्ये पथि चरन् प्रामाणिकतया कार्यं कुर्वन् शिष्यान् प्रेरयति सः वीरः इति कथ्यते। अर्थात् विवेकपूर्वकं जागरणकर्ता इति यावत्। स एव गिर्वणस्युः इत्यपि उच्यते। अर्थात् वाणीद्वारा ज्ञानप्रसारणकर्तेति यावत्। सः एव विदानो भवति। अर्थात् विद्वानिति यावत् [1]।

शिक्षणं न केवलं पुस्तकादपि त्वस्मान् परितो जायमानाभो घटनाभ्योऽपि शक्यते। मानवः जीवनयनेकाः समस्याः अनुभवति। अनुभवद्वाराप्यनेकेषां विषयाणां ज्ञानं प्राप्नोति। तत्रापि जीवनयापनसम्बद्धविषयाणां विषये तु अनुभवाः सन्निवेशाः सम्यक् ज्ञानं प्रयच्छन्ति। तादृशसन्निवेशेषु मृत्युसन्निवेशः अपि अन्यतमः। यदा अन्येषां मृत्युः आयाति तदा जीवनं न उपभोगार्थमिति जीवनस्य वास्तविकतायाः विषये ज्ञानमुदेति [2]।

## प्रश्नविधानम्

ज्ञानप्राप्तौ प्राश्निकप्रवृत्तिः नितरामपेक्ष्यते। यो विषयो ज्ञातव्यस्तस्य विषये प्रश्नान् पृष्ट्वा, ज्ञानं प्राप्तव्यम्। अत्र प्रश्नकरणे सीमा नास्ति। ज्ञातव्यमितीच्छया यावन्तोऽपि प्रश्नाः प्रष्टुं शक्यन्ते। प्रश्नोपनिषद्याख्यायिकेयं श्रूयते। [3] भारद्वाजः, सत्यकामः, गार्ग्यः, आश्वलायनः, भार्गवः, कात्यायनः इति षड् ऋषयः बभूवुः। ते ब्रह्मपराः ब्रह्मनिष्ठाः तज्जिज्ञासायुक्ताः सन्तः, पिप्पलादमाचार्यमुपसर्तुः। कथमुपसृतवन्तः? समित्पाणयस्सन्तः। ऋषयः वानप्रस्थाः इत्यतस्तेषामग्निकार्यं विहितम् । अतस्तस्मिन्नग्निकार्ययुपयुज्यमानास्समिधो गृहीत्वा गुरुमुपसर्पेदित्युच्यते।

पुनश्च यः एवं समिधो गृहीत्वागच्छति, सः ज्ञानप्राप्तययागच्छतीति ज्ञानिनां प्रतीयते। किञ्च रिक्तपाणिर्न सेवेत राजानं देवतां गुरुमित्यपि वाक्यं श्रूयते। [4]

तदा आचार्यः पिप्पलादः उवाच यत्, यद्यपि यूयं तपस्विनः एव, तथापि विशेषतः संवत्सरं कालं यावत् ब्रह्मचर्येण, श्रद्धया च वासं गुरुशुश्रूषापराः सन्तः कुरुथ। अनन्तरं भवदिच्छानुसारं यस्य विषये जिज्ञासा उदेति, तद्विषयकप्रश्नान् प्रष्टुं शक्नुवन्ति। युष्माभिः पृष्टस्य विषये यदि जानीमः, सर्वं वक्ष्यामः इत्युवाच भगवान् पिप्पलादः। एवमाचार्योक्तरीत्या सर्वेऽपि संवत्सरादूर्ध्वमुपसर्प्याचार्यं प्रश्नान् पृष्ट्वा ज्ञानमापुः ।

इदमवधेयं यत्, प्रश्नकरणेन ज्ञानप्राप्तिरित्येकोंऽशः। गुरोः उपसर्पणकरणकाले सविनयमुपसर्पणं कर्तव्यमिति द्वितीयोंऽशः। सर्वं जानामीत्याकारकवृत्तिः गुरोः न प्रदर्शिता। किन्तु जानामि चेत् वदामीति सविनयं वदति आचार्यः इति तृतीयोंऽशः।

## नाचिकेतविधानम्

कठोपनिषदि यमनचिकेतसोः संवादः सुप्रसिद्धः। [5] वाजश्रवसः विश्वजिता सर्वमेधेन ईजे। सः तस्मिन् क्रतौ सर्वस्वं धनं ददौ। तस्य नचिकेताः नाम पुत्रः बभूव। [6] वाजश्रवसः अनुपयुक्ताः गाः दानरूपेण ददासीत्। [7] एतत् दृष्ट्वा नचिकेतसः मनसि श्रद्धा जागृता। [8] सः पितरं पप्रच्छ। ऋत्विग्विशेषाय दक्षिणार्थं मां कस्मै दास्यसीति। एवं द्विवारं त्रिवारं पृष्टे क्रुद्धः सन् पिता मृत्यवे त्वां ददामीत्यवोचत्। यमलोके सः नचिकेताः त्रीणि दिनानि यमस्यागमनार्थं प्रतीक्षां चकारेति कारणात् यमः त्रीन् वरान् वृणीष्वेत्युवाच [9] ।

तथैव नचिकेताः पितुः कोपप्रशमनं प्रथमेन वरेण [10], स्वर्गप्राप्तिसाधनं नाचिकेताग्निविद्यां द्वितीयेन वरेण [11] तथा आत्मविषयकविद्यां तृतीयेन वरेण पप्रच्छ। इदमत्र अवधेयं यत् लघुबालकः नचिकेताः ज्ञानप्राप्त्यर्थं यावद्दूरं वा यत्स्थानं वा भवतु तत्र क्रमति। ज्ञानं प्राप्नोति। तृतीयमात्मविषयकं नोच्यते इत्युच्यमाने, बहुविधलोभैः मनसि विकारयुत्पाद्यमानेऽपि नाकर्षितस्सन् ज्ञानमवाप। अत्र संवादरूपं विधानं द्रष्टुं शक्नुमः।

## भृगुविधानम्

वारुणिः भृगुः पितरं वरुणं ब्रह्म ज्ञातुम् उपससार [12]। मां ब्रह्माधीहीति पप्रच्छ [13]। विधिवदुपसन्नं पुत्रमिदमुवाच। अन्नं प्राणः चक्षुः श्रोत्रं मनः वाचमित्येतानि ब्रह्मणः उपलब्धौ द्वाराणि भवन्तीति जगाद [14]। अनन्तरं ब्रह्मणः लक्षणमुक्त्वैतादृशं ब्रह्म विजिज्ञासस्वेत्युवाच [15]। तपस्तत्र साधनमित्यप्यवोचत्।

सः भृगुः तपस्तस्वान्नं ब्रह्मेति ज्ञात्वा पुनः पितुः समीपमाजगाम। भृगुः संशयमापन्नः आसीत्। अतः पिता तं सम्यक् निर्देशितवान्। भृगुः अन्नं प्राणः मनः विज्ञान ब्रह्मेति जानन् अन्ते आनन्दो ब्रह्मेति क्रमशः ज्ञानं लेभे ।

इदमत्रावधेयं यत्, पितैव गुरुः भवति पुत्रः एव शिष्यो भवत्यत्र। पुत्रेणान्तिमं ज्ञानं यत्प्राप्तव्यं तदर्थं क्रमशः मार्गं तथा साधनं च केवलं दर्शितवान्। पुत्रः तत्प्राप्तौ साधनद्वारा कार्यान्वियं चकार। यदा यदा द्वापरो जातः तदा तदा पितरं पुनरागत्य द्वापरं परिहृत्य अन्तिमं प्राप्तव्यमवाप।

## संवादविधानम्

नैकस्मिन् विषये नैके ज्ञातारः उपलभ्यन्ते। तेषां विदुषामध्ययनं गाढं भवति। तैस्सह भवनादेव ज्ञानं प्राप्यते। अतो यो यस्मिन् विषये ज्ञाता निष्णाता च भवति तस्मिन् विषये तैः सह संवादद्वारा ज्ञानप्राप्तिः शक्या [16]।

## संचारविधानम्

रामायणे घटनैका दृश्यते। विश्वामित्रर्षिः यागसंरक्षणार्थं रामलक्ष्मणौ नयति [17]। तेषां संचारकाले विश्वामित्रः तावुपदिशति। अनेकान् विचारानुद्बोधयति। [18] बलेत्यतिबलयति मन्त्रमुपदिशति। अत्र विश्वामित्रः वदति यत् मयि विद्यमानं ज्ञानं भवते वितरामीति। गुरोरयं भावो गरीयान् वर्तते। तयोः अनेकान् द्वापरान् परिहरति। [19] यदा तु ताटकासंहारसन्निवेशस्सन्निहितस्तदा रामस्य स्त्रीवधसंशयः उत्तिष्ठति। तदा विश्वामित्रः सोदाहरणं विवरणं कुर्वन् तस्य सन्देहं परिहरति [20]।

## प्रणिपातपरिप्रश्नविधानम्

भगवद्गीतायां अर्जुनं कृष्णः ज्ञानप्राप्त्युपायमुपदिदेश। विधिनाचार्यानभिगम्य प्रकर्षं नीचैः पतनरूपदीर्घनमस्कारः आचार्याणां कृते करणीयः। अनन्तरं कथं बन्धः कथं मोक्षः, का विद्या का अविद्येत्यादिप्रश्नाः प्रष्टव्याः। किञ्च ज्ञानिनः सेवापि विधातव्या। अनेन प्रकारेण क्रियमाणे ज्ञानी प्रसन्नः सन्नभीप्सितं ज्ञानं प्रददाति [21]।

## कथाविधानम्

बहवः प्रकाराः जिज्ञासूनां वर्तन्ते। ते तत्तत्सामर्थ्यानुसारमीप्सितेन मार्गेण ज्ञानं प्राप्नुवन्ति। तेषु कथाविधानमप्येकम्। विशेषेण बालाः कथामिच्छन्त्येव। सुदर्शननामाः एकः राजासीत्। तस्य चत्वारः पुत्राः आसन्। ते मूर्खाः आसन्। कथमिमान् शिक्षयामीति चिन्ता सुदर्शनं बाधते स्म। अतः विष्णुशर्मेत्येकः पण्डितः तानहं बोधयामीत्यब्रवीत्। सः तान् बालान् कथाद्वारा बोधयामास।

इमं प्रयत्नं हितोपदेशे द्रष्टुं शक्नुमः। तत्र कथाद्वारा नीतयः सद्विचाराः च निरूपिताः [22]।

**औचित्यविचारविमर्शः**

इदानींतनकाले ज्ञानप्राप्त्युपायः एकः प्रकारः दृश्यते। एकोऽध्यापकः एकस्मिन् पिहिते प्रकोष्ठे समूहमेकमुद्दिश्य बोधयति। छात्राः उपविश्य शृण्वन्ति। एक एव प्रकारः न सर्वेषामुपयोगाय कल्पते। तेन केचन एव उपकृता भवन्ति येषां स एकः प्रकारः अनुकूलोऽस्ति। एका रीतिः निरन्तरानुसरणेन जडतामापादयति। प्राचीनकाले विविधानि विधानानि ज्ञायन्ते विविधग्रन्थेभ्यः। गुरुकुलपद्धतिः अन्यतमा अस्ति। गुरोः कुले भूत्वा ज्ञानार्जनं बहुफलदायकम् उपयोगि च भवति
। यस्मात् गुरोः अन्तिके सदा वासो विद्यत इति कारणात् गुणाः शिष्येषु सङ्क्रामन्ते।

नैको मानवः नान्येन सदृशोऽस्ति। प्रत्येकं मानवस्य स्वभावः सामर्थ्यं भिद्यते। अतः कारणात् गुरुः छात्राणां ग्रहणसामर्थ्यं, धारणसामर्थ्यं, स्मरणसामर्थ्यं जानीयात्। तदनुसारं विधानमादृत्य ज्ञानवितरणं भवेत्। बालेभ्यः कथा रोचते। अतः कथाविधानेन विषयः पाठ्यते यदि तर्हि मनोरञ्जनेन सह ज्ञानार्जनं भवति। किञ्च यदि ज्येष्ठाः छात्राः वर्तन्ते, प्रश्नविधानम् अनुसर्यते, तेषां प्राश्निकप्रवृत्तिः वर्धते। तेन सममालोचनाशक्तिरपि वर्धते। एवं विविधविधनानाम् उपयोगेन छात्राणां ज्ञानार्जनं सम्यक् भवति।

## संदर्भ

1. मनीषिणः प्र भरध्वं यथायथा मतयः सन्ति नृणाम् । इन्द्रं सत्यैरेरयामा कृतेभिः स हि वीरो गिर्वणस्युर्विदानः ॥ (ऋक् – १०/१११/१)
2. मृत्योरहं ब्रह्मचारी ॥ (अथर्ववेदः – ६/१३३/३)
3. सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौसल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनस्ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः ॥ (प्रश्नोपनिषत् १ – १ – १)
4. तान्ह ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ। यथाकामं प्रश्नान् पृच्छत यदि विज्ञास्यामः सर्वं ह वो वक्ष्यामः इति ॥(प्रश्नोपनिषत् १ – १ – २)
5. उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ। तस्य ह नचिकेता नाम पुत आस। (कठोपनिषत् १-१-१)
6. पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः। अनन्दा नाम ते लोकाः तान्स गच्छति ता ददत्। (कठोपनिषत् १-१-३)
7. तगं ह कुमारगं् सन्तं दक्षिणासु नीयमानासु श्रद्धाविवेश सोमन्यत। (कठोपनिषत् १-१-२)
8. स होवाच पितरं तत कस्मै मां दास्यसीति। द्वितीयं तृतीयं तगं् होवाच मृत्यवे त्वा ददामीति। (कठोपनिषत् १-१-४)
9. तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन् ब्रह्मन् आतिथिर्नमस्यः।
नमस्ते अस्तु ब्रह्मन् स्वस्ति मे अस्तु तस्मात् प्रति त्रीन् वरान् वृणीष्व ॥ (कठोपनिषत् १-१-९)
10. शान्तसङ्कल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभि मृत्यो ।
त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे ॥ (कठोपनिषत् १-१-१०)
11. स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वग्गश्रद्धधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण ॥ (कठोपनिषत् १-१-१३)
12. भृगुर्वै वारुणिः। वरुणं पितरमुपससार । (तैत्तिरीयोपनिषत् - ३-१)
13. अधीहि भगवो ब्रह्मेति ।(तैत्तिरीयोपनिषत् - ३-१)
14. अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । (तैत्तिरीयोपनिषत् - ३-१)
15. तद्विजिज्ञासस्व । (तैत्तिरीयोपनिषत् - ३-१)
16. ज्ञानग्रहणाभ्यासः तद्विद्यैः सह संवादः (न्यायसूत्रम् – ४-२-४७)
17. तत्र सत्रं परित्रातुं विश्वामित्रो महामुनिः । सौमित्रिसहितं रामं नयन्नयमवोचत ॥ (चम्पूरामायणम् - बालकाण्डः – १ -३६)
18. बलेन तपसां लब्धे बलेत्यतिबलेति च ।
विद्येते मयि काकुत्स्थ विद्ये ते वितरामि ते ॥ (चम्पूरामायणम् - बालकाण्डः – १ -३६)
19. रामस्तमाकर्ण्य स्त्रीवधशंकामकरोत्। (चम्पूरामायणम्- बालकाण्डः – १ -३७)
20. किं च वैरोचनीं मन्थरां वसुन्धरापराधधुरन्धरां पुरन्दरेण निहतां जनार्दनकृतमर्दनां च भार्गवजननीं प्रदर्श्य दाशरथेरमन्दां

सन्दवधूवधविचिकित्सामुत्सारयामास।
(चम्पूरामायणम् – बालकाण्डः – १-३८)

21. तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिनः ॥ (भगवद्गीता ४-३४)

22. मित्रलाभः सुहृद्भेदः विग्रहः सन्धिरेव च ।
पञ्चतन्त्रात्तथान्यस्माद्ग्रन्थादाकृष्य लिख्यते ॥
(हितोपदेशः 0-१)
असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः ।
साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत् ॥
(हितोपदेशः १-२)